**SAMAGRA SHIKSHA, KERALA** **1011**

**First Terminal Evaluation - 2019-20**

First Language - Paper I - Part I

**SANSKRIT**

(For Academic and Oriental Sanskrit Schools)

**Class- X**

Time 1 ½ Hours Total Score - 40

**निर्देशाः -**

- १५ निमेषाः समाश्वासकालः ।
- प्रश्नान् निर्देशान् च सम्यग् अवगम्य एव उत्तराणि लेखनीयानि ।
- उत्तरलेखने मूल्याङ्काः कालः च परिगणनीयाः।
- विवर्तनप्रश्नाद् ऋते सर्वेषां प्रश्नानाम् उत्तरलेखने देवनागरीलिपिरुपयोक्तव्या ।

**1. अधोदत्तेषु चतुर्णां प्रश्नानाम् उत्तराणि कोष्ठकात् निर्धार्य लिखत।** 4x1=4

**क)** सुखदुःखयोः कर्ता कः ?
(मनः , शरीरम्, आत्मा , चक्षुः )

**ख)** अधोदत्तेषु फलपाकान्तं सस्यं किम् ?
(कदली, पनसः, आम्रः, द्राक्षा )

**ग)** दीनं वृषभं दृष्ट्वा का रुरोद ?
(पार्वती , सुरभिः, लक्ष्मीः, सुरसा)

**घ)** '**भिक्षा**' इत्यर्थकं पदं लिखत ।
(हास्यम् , दाक्ष्यम् , लास्यम् , भैक्ष्यम् )

**ङ)** कः गणे नान्तर्भवति ?
(वसन् , रुदन्, आसन्, वदन्)

**2. यथोचितं पट्टिकां पूरयत ।** 4x1=4

| कृतिः | कर्ता | विभागः |
|---|---|---|
| महाभारतम् | .............. | इतिहासः । |
| ................ | सुरपालः | शास्त्रग्रन्थः । |
| शङ्करदिग्विजयम् | माधवविद्यारण्यस्वामी | .............. । |
| कनकधारास्तवम् | .............. | स्तोत्रग्रन्थः। |

3. उदाहरणानुसारं सन्धिच्छेदं लिखत। 1x1=1

उदा- सम्पन्नेऽस्मिन् - सम्पन्ने + अस्मिन्।

क) पाठेऽस्मिन् - ........... + ...........।

4. अधोदत्तवाक्यात् सम्बोधनपदं चित्वा लिखत। 1x1=1

क) हे मातः ! भिक्षां देहि ।

5. उदाहरणानुसारं विग्रहवाक्यं लिखत। 1x1=1

उदा- विद्वेषयुक्तः - विद्वेषेण युक्तः ।

क) सन्तोषयुक्तः - .........................।

6-10 प्रश्नेभ्यः चतुर्णाम् उत्तराणि लिखत । 4x2=8

6. अधोदत्तं वाक्यं पठित्वा शतृशानजन्तौ विविच्य लिखत।

बालः लोकक्रिक्कट् स्पर्धायां भारतसङ्घस्य पतनं पश्यन् नितरां क्रन्दमानः अवर्तत।

7. अधोदत्तं श्लोकं पठित्वा गद्यक्रमं पूरयत।

स हि जातु गुरोः कुले वसन्
सवयोभिः सह भैक्ष्यलिप्सया।
भगवान् भवनं द्विजन्मनो
धनहीनस्य विवेश कस्यचित्।।

गद्यक्रमः - गुरोः कुले ........... स भगवान् भैक्ष्यलिप्सया ........... सह जातु कस्यचित् ........... द्विजन्मनः भवनं ........... हि ।

8. 'स्वस्थचित्तेन सेव्यमानः आहारः आरोग्याय भवति ' इति आशययुक्तं सुभाषितं चित्वा लिखत।

क) धन्यानामुत्तमं दाक्ष्यं
धनानामुत्तमं श्रुतम्।
लाभानां श्रेष्ठमारोग्यं
सुखानां तुष्टिरुत्तमा।।

ख) ईर्ष्याभयक्रोधसमन्वितेन
लुब्धेन रुग्दैन्यनिपीडितेन।
विद्वेषयुक्तेन च सेव्यमानम्
अन्नं न सम्यक् परिपाकमेति।।

9. उदाहरणानुसारं ' यद्यपि - तथापि ' उपयुज्य वाक्यं परिवर्तयत ।

उदा - जनाः चित्रशालाम् अगच्छन्। तत्र चित्रप्रदर्शनं नासीत्।

यद्यपि जनाः चित्रशालाम् अगच्छन् तथापि तत्र चित्रप्रदर्शनं नासीत्।

क) सूर्यः उदयति । वर्षामेघाधिक्यात् प्रकाशः न भवति ।

**10. अधोदत्तं वाक्यं पठित्वा ल्यबन्त-तुमुन्नन्तपदे चित्वा लिखत।**

क्षेत्रे पतितं वृषभं विलोक्य सुरभिः रोदितुम् आरभत ।

**11-13 प्रश्नेभ्यः द्वयोः उत्तरे लिखत ।** **2x4=8**

**11. श्लोकं पठित्वा प्रश्नानाम् उत्तराणि लिखत।**

अपत्येषु च सर्वेषु
जननी तुल्यवत्सला।
पुत्रे दीने तु सा माता
कृपार्द्रहृदया भवेत्।।

**क)** ' माता ' इत्यस्य अपरं पदं श्लोकात् चित्वा लिखत।

**ख)** सर्वेषु अपत्येषु माता कीदृशी भवति ?

**ग)** अस्मिन् श्लोके क्रियापदं किम् ?

**घ)** माता कस्मिन् कृपार्द्रहृदया भवेत् ?

**12. उवाहरणानुसारं क्रियापदपट्टिकां पूरयत।**

**( पिबति , भवेत् , अलिखत्, नयतु, त्रसेत् , करोति , अवसत् , पठतु)**

| | लट् | लङ् | लोट् | विधिलिङ् |
|---|---|---|---|---|
| उदा - | करोति | अवसत् | नयतु | भवेत् |
| | | | | |

**13. खण्डिकां पठित्वा प्रश्नानाम् उत्तराणि लिखत।**

पालक्काट् जिल्लायां लब्धजन्मा ओ. वि. विजयन् महाभागः न केवलं चित्रकारः अपि तु कथाकारः च भवति । सः 1930 तमे वर्षे जूलै 2 तमे दिने जनिमलभत। सः पद्मभूषण्, साहित्य-अक्कादमी , एषुत्तच्छन् इत्यादिभिः पुरस्कारैः च समादृतः केरलीयः भवति। अस्य ' खसाक्किन्टे इतिहासम् ' इति आख्यायिका अतीव प्रसिद्धा। धर्मपुराणं , प्रवाचकन्टे वषि, मधुरं गायति इत्यादयः तस्य इतरे ग्रन्थाः।

**क)** ओ. वि. विजयन् महाभागेन विरचिता आख्यायिका का ?

**ख)** ओ. वि. विजयन् महाभागः कुत्र जनिमलभत ?

**ग)** खण्डिकातः भूतकालक्रियापदं चित्वा लिखत ।

**घ)** कैः पुरस्कारैः ओ. वि. विजयन् महाभागः समादृतः ?

**14. प्रादेशिकभाषया विवर्तयत।** **1x5=5**

भारते प्रथितः गान्धिशिष्यः , परिस्थितिप्रवर्तकः च भवति सुन्दर्लाल् बहुगुणा महाशयः। सः उत्तराखण्ड् राज्ये मरोदा ग्रामे 1927 तमे वर्षे जनुवरि 9 दिनाङ्के जनिमलभत। वननशीकरणम्, सेतुबन्धनम्, खननम् इत्यादीनि प्रकृतिनाशाय भवन्ति इति सः उद्बोधयति। तन्निवारणाय सः सततं प्रयतते। प्रकृतिसंरक्षणे निरतः सः 2009 तमे वर्षे 'पद्मविभूषण्' पुरस्कारेण समादृतः ।

**15-17 प्रश्नेभ्यः द्वयोः उत्तरे लिखत ।** **2x4=8**

**15. अधोदत्तां खण्डिकां पठित्वा सम्भाषणांशान् पूरयत।**

गुरुकुले वसन् श्रीशङ्करः भिक्षार्थं सतीर्थ्यैः सह एकं ब्राह्मणगृहं प्राप्तवान् । 'अम्ब! भिक्षां देहि' इति शब्दं श्रुत्वा बहिरागता ब्राह्मणपत्नी दीनवचसा 'भिक्षां दातुं किमपि नास्ति, केवलम् आमलकमेव' इति अवदत् । 'भवति! यत्किमपि दीयताम् ' इति तस्य वचनम् अनुसृत्य कुटुम्बिनी शुष्कम् एकम् आमलकम् आनयत् । 'बाल! इदं स्वीकरोतु' इत्युक्त्वा तत् शङ्कराय अदात् ।

शङ्करः - अम्ब ! ................ ।

कुटुम्बिनी - अत्र भिक्षां दातुं किमपि नास्ति,केवलम् आमलकमेव ।

शङ्करः - भवति! ............... दीयताम्।

कुटुम्बिनी - ............... स्वीकरोतु।

शङ्करः - ................।

**16. वृक्षायुर्वेदे प्रतिपादितान् सस्यप्रभेदान् अधिकृत्य सूचनाः उपयुज्य लघुविवरणं लिखत।**

**सूचनाः** - सुरपालः - तरुमहिमा - सस्यानि – चतुर्धा - व्यक्तपुष्पः - लतारूपः - उदुम्बरादयः ।

**17. अधोदत्तं सुभाषितं स्वजीविते कथं उपकरोति इति सूचनाः उपयुज्य लिखत ।**

परिश्रमो मिताहारो
भूगतावश्विनीसुतौ ।
तावनादृत्य नैवाहं
वैद्यमन्यं समाश्रये ।।

**सूचनाः** - नित्यव्यायामः - योगः, क्रीडा इत्यादयः - हितमिताहारशीलः - उन्मादकवस्तूनां वर्जनम्- दिनचर्या - आरोग्यपूर्णजीवितम् ।